# ISWK SHARING KNOWLEDGE

## Class - VII

## Subject- Sanskrit 3rd Language

**पाठ: - लोट्-लकार: (आज्ञार्थकम्)**

By- Geethu praseed

# 5 लोट्-लकारः (आज्ञार्थकम्)

लोट् लकार का प्रयोग आज्ञा या आदेश के लिए किया जाता है; जैसे–सः पठतु अर्थात् वह पढ़े, त्वम् पठ अर्थात् तुम पढ़ो।

## लोट् लकारः–पठ् ( पढ़ना )

| एकवचनम् | | द्विवचनम् | | बहुवचनम् | |
|---|---|---|---|---|---|
| (सः) | पठतु | (तौ) | पठताम् | (ते) | पठन्तु |
| (त्वम्) | पठ | (युवाम्) | पठतम् | (यूयम्) | पठत |
| (अहम्) | पठानि | (आवाम्) | पठाव | (वयम्) | पठाम |

Private Limited

(विद्यालयस्य दृश्यः, छात्राः आचार्येण सह वार्तालापं कुर्वन्ति।)

**छात्राः** – आचार्य! वयं प्रणमामः।

**आचार्यः** – चिरं जीवत, आयुष्मान् भवत।

**अरुणाभः** – श्रीमन्! किं वयम् अद्य पठिष्यामः?

**आचार्यः** – न, न! अद्य तु वयं वार्तालापः करिष्यामः। त्वं बहिः गच्छ सर्वान् छात्रान् च बहिः नय। अहम् अपि तत्र आगच्छामि।



© New Saraswati House (India)

**अरुणाभः** – चैतन्य, सात्त्विक, सुमन्त्र! सर्वे अत्र आगच्छत। अद्य वयं कक्षायाः बहिः तिष्ठाम। सर्वे आगच्छन्तु।

(सर्वे बहिः क्षेत्रे तिष्ठन्ति, आचार्यः अपि आगच्छति।)

**आचार्यः** – यूयं किमर्थं प्रसन्नाः स्थ?

**सुमन्त्रः** – आचार्य! कक्षायाः बहिः हरिताः पादपाः, सुन्दराणि पुष्पाणि विस्तृतं क्षेत्रं च अस्ति; अत्र आगत्य वयं प्रसन्नाः स्मः।

**चैतन्यः** – गुरुवर! अद्य भवान् अस्मान् नैतिकनियमान् कर्त्तव्यान् च वदतु।

**आचार्यः** – चैतन्य! सुखी भव! त्वं शोभनः बालकः असि। सर्वं जानासि। तदापि किञ्चिद् वदामि।

सत्यं वद। धर्मं चर। गुरुजनान् नम। असत्यं मा ब्रूहि। ये गृहं गत्वा मातरं पितरं च नमन्ति ते सदा सुखिनः भवन्ति। दीनानां सहायतां कुरु। विद्यां प्राप्य देशस्य सेवां कुरु।

स्वास्थ्यरक्षा अपि आवश्यकी। सदा पौष्टिकं भोजनं कुरु। फलानि अपि खाद। जलं पिब। अधुना यूयं सर्वे गच्छत कन्दुकेन च क्रीडत। श्रुतिः, प्रियंवदा गीतिका चापि गच्छन्तु क्रीडन्तु च।

Limited

**सात्त्विकः** – आचार्य! एतानि सुवचनानि वयं सदा स्मरिष्यामः। अधुना अहं गच्छामि। वयं सर्वे गच्छाम। वयं प्रणमामः।

**आचार्यः** – गच्छत! सदा सुखिनः भवत। प्रसन्नाः भवत।



© New Saraswati House (India) Private



## शब्द-शक्तिः (Word Meanings)

| | | | | | |
|---|---|---|---|---|---|
| **वार्तालापम्** | – बातचीत | dialogue, conversation | **शोभनः** | – अच्छा | good |
| **चिरम्** | – बहुत समय तक | for a long time | **ब्रूहि** | – (तुम) बोलो | (you) speak |
| **क्षेत्रे** | – मैदान में | in the field | **गत्वा** | – जाकर | after going |
| **हरितः** | – हरा | green | **प्राप्य** | – प्राप्त करके, पाकर | after getting |
| **पादपाः** | – पौधे | plants | **कन्दुकेन** | – गेंद से | with the ball |
| **विस्तृतम्** | – बड़ा | vast | **गच्छन्तु** | – (वे) जाएँ | (they) may go |
| **आगत्य** | – आकर | after coming | **सुवचनानि** | – अच्छी बातें | good words |

### नई धातुएँ (New Roots)

| | | | | | |
|---|---|---|---|---|---|
| **प्र + नम् (प्रणम्)** | – प्रणाम करना | to bow | **कृ** | – करना | to do |
| | | | **स्था (तिष्ठ्)** | – ठहरना | to stay |

### नए अव्यय (New Indeclinables)

| | | | | | |
|---|---|---|---|---|---|
| **बहिः** | – बाहर | outside | **मा** | – नहीं | no, do not |
| **तदापि** | – तो भी | even then | **किञ्चित्** | – कुछ | something, few |

### सन्धियुक्त शब्द (Joined Words)

| | | | | |
|---|---|---|---|---|
| **वार्तालापम्** | – वार्ता + आलापम् | | **चापि** | – च + अपि |
| **तदापि** | – तदा + अपि | | | |

### उपसर्ग एवं प्रत्यययुक्त शब्द (Words with prefix and suffix)

| | | | |
|---|---|---|---|
| **आगत्य** | – **आ** उपसर्ग, **गम्** धातु, **ल्यप्** प्रत्यय | **प्राप्य** | – **प्र** उपसर्ग, **आप्** धातु, **ल्यप्** प्रत्यय |
| **गत्वा** | – **गम्** धातु, **क्त्वा** प्रत्यय | | |

vati House (India) Private Limited



# अभ्यास

© New Saraswa

## सम्प्रति लेखनीयम्

**1. उचितेन पदेन उत्तरत।**

(उचित शब्द में उत्तर दीजिए। Choose the correct answer.)

| | | |
|---|---|---|
| (क) छात्राः **कं** प्रणमन्ति? | (जनकम्, आचार्यम्, अम्बाम्) | ................................ |
| (ख) जनाः विद्यां प्राप्य **कस्य** सेवां कुर्वन्ति? | (परिवारस्य, समाजस्य, देशस्य) | ................................ |
| (ग) पादपाः **कीदृशाः** आसन्? | (हरिताः, पीताः, रक्ताः) | ................................ |
| (घ) क्षेत्रं **कीदृशम्** अस्ति? | (संकुचितम्, विस्तृतम्, दीर्घम्) | ................................ |



**2. निम्नलिखितानि वाक्यानि लङ्लकारे लिखत।**

(निम्नलिखित वाक्यों को लङ् लकार (भूतकाल) में लिखिए। Write the following sentences into past tense.)

| | |
|---|---|
| **उदाहरणम्**— त्वं बहिः **गच्छ**। | त्वं बहिः **अगच्छः**। |
| (क) अधुना अहं **गच्छानि**। | .................................................... |
| (ख) अधुना यूयं सर्वे **गच्छत**। | .................................................... |
| (ग) सदा सुखी **भवत**। | .................................................... |
| (घ) दीनानां सहायतां **कुरु**। | .................................................... |
| (ङ) त्वं जलं **पिब**। | .................................................... |
| (च) सत्यं **वद**। धर्मं **चर**। | .................................................... |

imited

3. **मञ्जूषायां दत्तैः शब्दैः रिक्तस्थानानि पूरयत।**

(मंजूषा में दिए गए शब्दों से रिक्त स्थान भरिए। Fill in the blanks with the words given in the box.)

गुरुजनान्, सत्यम्, मा, चर, भवन्ति, सहायताम्, कुरु, प्राप्य, ते, गत्वा।

............................ वद। धर्मं ............................। ............................ नम। असत्यं ............................ ब्रूहि। ये गृहं ............................ मातरं पितरं च नमन्ति ............................ सदा सुखिनः ............................। दीनानाम् ............................ कुरु। विद्याम् ............................ देशस्य सेवाम् ............................।

## भाषा-अवबोधनम्

1. **कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत।**

(कोष्ठक से उचित पद चुनकर रिक्त स्थान की पूर्ति कीजिए। Choose the correct word from the bracket and fill in the blanks.)

(क) पिता ............................ सह गच्छति। (पुत्रस्य, पुत्रेण, पुत्रात्)

(ख) शिष्यः ............................ सह गच्छति। (शिक्षकेण, शिक्षकाय, शिक्षकस्य)

(ग) बालः ............................ बहिः गच्छति। (गृहम्, गृहेण, गृहात्)

(घ) छात्राः ............................ सह भ्रमणाय गच्छन्ति। (आचार्यम्, आचार्येण, आचार्यात्)

(ङ) वयं ............................ बहिः तिष्ठामः। (कक्षात्, कक्षायाः, कक्षया)

(च) त्वम् ............................ बहिः किमर्थं क्रीडसि? (उद्यानस्य, उद्यानेन, उद्यानात्)

(छ) बालकः ............................ नमति। (मातरम्, मात्रा, मातुः)

2. **निम्नलिखितेषु वाक्येषु क्रियापूर्तिः उचितलोट्लकारेण कुरुत।**

(निम्नलिखित वाक्यों में क्रिया-पूर्ति उचित लोट् लकार (आज्ञार्थक क्रिया) से कीजिए। Fill in the blanks in the following sentences with the correct forms of the verbs in imperative mood.)

(क) वयं सर्वे अत्र ............................। (तिष्ठानि, तिष्ठाम, अतिष्ठाम)

(ख) हे ईश! त्वं माम् ............................। (रक्षतु, रक्षसि, रक्ष)

© New Saraswati House (India) Private Limited

(ग) भो बालक! त्वं गृहं ............................... ।    (गच्छ, गच्छानि, गच्छतु)

(घ) भो छात्र! अत्र ............................... ।    (आगच्छसि, आगच्छ, आगच्छथ)

(ङ) यूयं कन्दुकेन ............................... ।    (क्रीडन्तु, क्रीडत, क्रीडाम)

(च) त्वम् अस्मान् कर्त्तव्यान् ............................... ।    (वदानि, वदन्तु, वद)

(छ) ते सदा सुखिनः ............................... ।    (भवतु, भवत, भवन्तु)

## मूल्यपरकम्

1. नैतिकनियमाः पालनीयाः उपेक्षणीयाः वा? (नैतिक नियमों का पालन करना चाहिए या उपेक्षा करनी चाहिए?)
2. यदा अध्यापिका कक्षायां प्रविशति किम् त्वं तस्याः सम्मानार्थम् आसनात् उत्तिष्ठसि? (जब अध्यापिका कक्षा में प्रवेश करती हैं, क्या आप उनके सम्मान में उठकर खड़े होते हैं?)

e Limited



## क्रियाकलापः

1. छात्र पाठ में आए हुए लोट् लकार के शिक्षाप्रद वाक्यों को छाँटकर अपनी संचिका में लिखें और क्रिया पदों को रंजित करें; जैसे– यूयम् पर्यावरणस्य रक्षाम् कुरुत। मातृ देवो भव।
2. छात्र इसी प्रकार के अन्य शिक्षाप्रद वाक्यों का संग्रह करके चार्ट आदि बनाएँ तथा कक्षा को सजाएँ।
3. रंगों का प्रयोग करके संचिका में इंद्रधनुष बनाएँ और उसके रंगों के नाम संस्कृत में लिखें।
4. उदाहरणानुसार निम्नलिखित शब्दों में उपसर्ग, धातु तथा प्रत्यय अलग-अलग करें।

उदाहरण–

| शब्द | उपसर्ग | धातु | प्रत्यय |
|---|---|---|---|
| 1. उपगम्य | उप | गम् | ल्यप् |
| 2. प्रणम्य | .................. | .................. | .................. |
| 3. पठित्वा | .................. | .................. | .................. |
| 4. आनीय | .................. | .................. | .................. |

इसी प्रकार और भी शब्द लेकर तालिका बनाएँ।



## याद रखें

1. सह शब्द के योग में तृतीया विभक्ति का प्रयोग होता है; यथा–सीता **रामेण** सह गच्छतु।
2. बहि: के योग में पंचमी विभक्ति का प्रयोग होता है; यथा–वयम् **कक्षायाः** बहिः तिष्ठाम।
3. लोट् लकार का प्रयोग संस्कृत भाषा में आज्ञा के लिए किया जाता है।

**सूक्तिः**

**॥ वाग्भूषणं भूषणम् ॥**

(सुसंस्कृत वाणी ही सच्चा आभूषण है।)

© New Saraswati House (India) Private

# उत्तराणि |

**सम्प्रति लेखनीयम्**

1.उचितेन पदेन उत्तरत | (उचितेन शब्द में उत्तर दीजिए | Choose the correct answer.)

(क) आचार्यम्    (ख) देशस्य    (ग) हरिता:    (घ) विस्तृतम्

2. निम्नलिखितानि वाक्यानि लङ्लकारे लिखत | (निम्नलिखित वाक्यों को लङ् लकार(भूतकाल) में लिखिए |Write the following sentences into past tense.)

(क) अधुना अहं अगच्छम् |
(ख) अधुना यूयं सर्वे अगच्छत |
(ग) सदा सुखी अभवत |
(घ) दीनानां सहायतां अकरो: |
(ङ) त्वं जलं अपिब: |
(च) सत्यं अवद: | धर्मं अचर: |

3. मञ्जूषायां दत्तै: शब्दै: रिक्तस्थानानि पूरयत | (मंजूषा में दिए गए शब्दों से रिक्त स्थान भरिए | Fill in the blanks with the words given in the box.)

सत्यं वद | धर्मं चर | गुरुजनान् नम | असत्यं मा ब्रूहि | ये गृहं गत्वा मातरं पितरं च नमन्ति ते सदा सुखिन: भवन्ति | दीनानाम् सहायताम् कुरु | विद्याम् प्राप्य देशस्य सेवाम् कुरु |

**भाषा-अवबोधनम्**

1.कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत | (कोष्ठक से उचित पद चुनकर रिक्त स्थान की पूर्ति कीजिए | Choose the correct word from the bracket and fill in the blanks.)

(क) पिता पुत्रेण सह गच्छति |
(ख) शिष्य: शिक्षकेण सह गच्छति |
(ग) बाल: गृहात् बहि: गच्छति |
(घ) छात्रा: आचार्येण सह भ्रमणाय गच्छन्ति |
(ङ) वयं कक्षाया: बहि: तिष्ठाम: |
(च) त्वम् उद्यानात् बहि: किमर्थं क्रीडसि ?
(छ) बालक: मातरम् नमति |

2.निम्नलिखितेषु वाक्येषु क्रियापूर्ति: उचितलोट्लकारेण कुरुत | (निम्नलिखित वाक्यों क्रिया-पूर्ति उचित लोट् लकार (आज्ञार्थक क्रिया) से कीजिए | Fill in the blanks in the following sentences with the correct forms of the verbs in imperative mood.)

(क) वयं सर्वे अत्र तिष्ठाम |
(ख) हे ईश ! त्वं माम् रक्ष |
(ग) भो बालक ! त्वं गृहं गच्छ |
(घ) भो छात्र ! अत्र आगच्छ |
(ङ) यूयं कन्दुकेन क्रीडत |
(च) त्वम् अस्मान् कर्तव्यान् वद |
(छ) ते सदा सुखिन: भवन्तु |

# मूल्यपरकम्

1. अस्माभि: नैतिकनियमानां कर्तव्यानां च पालनं करणीयम् |
2. यदा अध्यापिका कक्षायां प्रविश्यति तदा अहं सम्मानार्थम् आसनात् उत्तिष्ठामि |



# धन्यवादः ।

*******************